# स्तोत्रसाहित्यस्य संवर्द्धने वामनपुराणस्य योगदानम्

डा. कमला पाण्डेया

यद्यपि कमनीय-कविता-कालिन्दी-कूले शृङ्गारादि नवरसरुचिरा निर्झराः स्वतो निःस्वनन्ति, तथापि सुविमलभावतरङ्गा भक्तिमन्दाकिनी यावन्न सङ्गच्छेत् न तावत् सकलप्रयोजनमौलिभूतं ब्रह्मानन्दसहोदरं पर निर्वृत्तिरूपं प्रयोजनं प्रतिफल्येत इति मन्यामहे। अतएव *अद्वैतसिद्धि*कारोऽपि मधुसूदनसरस्वती देवादिविषयिणीं रतिं भक्तिरसरूपेण उरीकुर्वाणः[1] खण्डयति भावध्वनिवादिनो[2] मम्मटाद्यलङ्कारशास्त्रिणः। अस्या भक्तिधारायाः सौन्दर्यलहरिका यत्रोच्छलन्ति तत्खलु स्तोत्रसाहित्यमिति कथ्यते।

प्रायशः स्तोत्रसाहित्यस्यापि उपजीव्यानि पुराणानि, तेषु क्रमप्राप्तस्य *वामनपुराणस्य* कियद् योगदानमस्य संवृद्धाविति विज्ञातुं पत्रमिदं प्रस्तूयते। *वामनपुराणे* प्रारम्भत एव स्तुतिपराणां वर्णानानां बाहुल्यं वर्तते। तथाहि - ब्रह्महत्यया आक्रान्तेन शम्भुना कुरुक्षेत्रं प्राप्तं तत्र च चक्रपाणेर्नारायणस्य स्तुतिः कृता - 'नमस्ते देवतानाथ नमस्ते गरुड़ध्वज[3] इति। ब्रह्महत्या-विमुक्तये प्रार्थयता तेन प्रोक्तम्-

नमो नमस्तेऽच्युतचक्रपाणे! नमोऽस्तुते वामनमीनमूर्ते!
लोके भवान् कारुणिको मतो मे; त्रायस्व मां केशव! पाशबन्धात्[4]।।

तदा नारायणेन निर्दिष्टः शिवः वरणासिनद्योः मध्येस्थितां वाराणसीमागत्य लोलार्ककुण्डे स्नात्वा दशाश्वमेध-दर्शनं कृतवान्। ब्रह्महत्यायामपगतायामपि तस्य हस्तात् कपालो न गतः। अनन्तरं तत्रैव एकस्मिन् महाह्रदे यदा तेन स्नानमकारि तदा कपालो हस्तात्पतितः। तस्य ह्रदस्य नाम कपालमोचनमिति विख्यातम्। शिवं कपालीति मत्त्वा दक्षः स्वयज्ञे तं न न्यमन्त्रयत्। अतएव दुःखिता शिवभार्या सती प्राणानत्यजत्। दुष्परिणामतः वीरभद्र-भद्रकाल्योः नेतृत्वे शिवगणाः दक्षयज्ञ-विध्वंसाय विनाशलीला अकुर्वन्। तत्सन्दर्भे एव शिवशरीरान्निर्गतः दिव्यशरीरधृग् वह्वचः ब्राह्मणरूपो धर्मः स्वभार्यायामहिंसायां चतुरः पुत्रान् जनयामास - हरिः कृष्णः नरो नारायणश्च। तौ नरनारायणौ हिमाद्रौ बदरिकाश्रमे परब्रह्मस्तवनं चक्राते-

प्रालेयाद्रिं समागम्य तीर्थे बदरिकाश्रमे।
गणं तौतत्परं ब्रह्म गङ्गायां विपुले तटे।। वा. पु. 6.4

विष्णुना ब्रह्मणा च हरलिङ्गम् इत्थं स्तुतम्-

नमोऽस्तु ते शूलपाणे! नमोऽस्तु वृषभध्वज।
जीमूतवाहन! कवे! शर्व! त्र्यम्बक! शङ्कर।। 6.78.80

अनन्तरम् अशून्यशयनव्रतं साङ्गोपाङ्ग निरूपितम्। व्रतेऽस्मिन् भगवतो नारायणस्य स्तवनं विधीयते-

नमोऽस्तुते पद्मनाभ पद्माधव महाद्युते - इत्यारभ्य
धर्मार्थ - काम - मोक्षा मे ह्यखण्डाः सन्तु केशव!
विभासि पद्मपत्राक्ष! यथाऽखण्डोऽसि सर्वतः।। इति 17.21

तदनन्तरं परमपवित्रं वैष्णवपञ्जराख्यं स्तवनं दशश्लोकेषु सुष्ठु उपगुम्फितम्-

'नमो नमस्ते देवेश...[5] इत्यारभ्य अकूपार!
नमस्तुभ्यं महामीन! नमोऽस्तुते' इत्यन्तम्।

अस्य स्तोत्रस्य माहात्म्यमित्थं प्रकटितम्–

एतदुक्तं भगवता वैष्णवं पञ्जरं महत्।
पुरा रक्षार्थमीशेन कात्यायन्यै द्विजोत्तम।। 17.37
नाशयामास सा यत्र दानवं महिषासुरम्।
चामरं रक्तबीजं च तथाऽन्यासुरकण्टकान्।। 17.38

वैष्णवपञ्जर स्तोत्रप्रभावेन दैत्यान् मर्दयन्तीं भगवतीं देवा इत्थं स्तुन्वन्ति–

नमोऽस्तु दैव्यै सुरपूजितायै
या संस्थिता योगविशुद्धदेहा।
निद्रास्वरूपेण महीं वितत्य
तृष्णा–त्रपा–क्षुद्भयदा च कान्ति।। इत्यादिः 18.19–20

अपि च बलिप्रतापेन अभिभूताः देवता कश्यपऋषिमुपजग्मुः। तेषां प्रार्थनामाकर्ण्य स नारायणमस्तावीत्–

ॐ नमो भगवते वासुदेवाय। "एक शृङ्ग वृषसिन्धो वृषाकपे सुरवृष अनादिसंभवरुद्र कपिल विष्वक्सेन सर्व–भूतपते ध्रुव धर्म वैकुण्ठ वृषावर्त अनादि–मध्य–निधन धनञ्जय शुचिश्रव पृश्नितेजः निजजय अमृतशय सनातन त्रिधामन् तुषित महातत्त्व लोकनाथ पद्मनाभ विरिञ्चे बहुरूप अक्षय अक्षर हव्यभुक् खण्डपरशो शक्र मुंजकेश हंस महादक्षिण हृषीकेश सूक्ष्म महानियमधर विरजः लोकप्रतिष्ठ अरूप अग्रजनि धर्मजनि धर्मनाथ हव्यभुग् गभस्तिनाथ शतक्रतुनाथ चन्द्ररथ सूर्यतेजः समुद्रवासः अज सहस्रशिरः सहस्रपाद अयोमुख महापुरुष पुरुषोत्तम सहस्रबाहो सहस्रमूर्ते सहस्रास्य सहस्रसंभव विश्वं त्वामाहुः पुष्पहास चरम त्वमेव वौषट् वषट्कारं त्वामाहुः। अग्र्यमखेषु प्राशितारं शतधारं सहस्रधारं बभूव। भूवंद्य भूनाथ भृगुपुत्र वेदवेद्य ब्राह्मणप्रिय त्वमेव द्यौरसि मातरिश्वासि धर्मोऽसि होता पोता हंता मन्ता नेता"...... इत्यादिः।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तुभ्यं होत्रात्मने नमः।। अ. 26.1

ऋषिपत्नी अदितिरपि पुत्रकाम्या सती दशसहस्रवर्षाणि तपस्तेपे। मौनमालम्ब्य वायुं पायं पायं नारायणं प्रणमन्ती सा कथयति – नमः कृत्यार्तिनाशाय नमः पुष्करमालिने[6] ! इति। विंशत्यधिकेषु श्लोकेषु सा उपश्लोकयति उपेन्द्रम्। वरप्राप्ते सति पुनरपि 'प्रसीद देव देवेश नमस्ते विश्वभावन (अ. 28.11)) इत्युक्तवती।

अहो! भक्तप्रवरेण प्रह्लादेन भगवतो वासुदेवस्य अंशावतारस्य सूचना यथा स्वप्रपौत्राय दत्ता, सा अतीव भक्तिप्रस्रविणी। तद्यथा–

प्रभुः प्रभूणां परमः पराणाम्
अनादि–मध्यो भगवाननन्तः।।
त्रैलोक्यमंशेन सनाथमेकः
कर्तुं महात्मा दितिजोऽवतीर्णः।। 29.19
अंशाऽवतीर्णेन चयेन गर्भे
हृतानि तेजांसि महासुराणाम्।
नमामि तं देवमनन्तमीशम्
अशेषसंसारतरोः कुठारम्।। 29.26

अथ अदितिगर्भे स्थितः स खलु अवतारी दशमे मासे वामनाकृतिरजायत। तस्मिन् समये लोकपितामहो ब्रह्म तस्य जातकर्मादिकान् विधाय तमित्थं तुष्टुवे–

जयाधीश जयाजेय जय सर्वगुरो! हरे!

जरामृत्यु – जरातीत जयानन्त – जयाच्युत।। इत्यारभ्य 'प्रभवायास्य विश्वस्य विश्वात्मन् पृथुलोचन![7] इत्यन्तं चतुर्दशश्लोकेषु कृता एषा स्तुतिः वामनमूर्तिं विशदीकरोति।

अथ मार्कण्डेयो महामुनिः सरस्वतीं महानदीं तुष्टाव त्वं देविसर्वलोकानां माता वेदारणिः शुभा – इत्यारभ्य[8] अष्टादशश्लोक पर्यन्तं भगवतीं स मुनिः नमश्चकार। अनन्तरं मङ्कण ऋषेः शिवस्तुतिः तदनु च ब्रह्मणः शिवस्तुतिः अतीव हृदयावर्जिका–

अनन्ताय नमस्तुभ्यं वरदाय पिनाकिने।
महादेवाय देवाय स्थाणवे परमात्मने।। 44.5
नमोऽस्तु भुवनेशाय तुभ्यं तारक! सर्वदा।
ज्ञानानन्दायको देवः त्वमेकः पुरुषोत्तमः।। 6
नमस्ते पद्मगर्भाय हृत्पद्मशायिने नमः।
घोर शातितपापाय चण्डक्रोध नमोऽस्तु ते।। 7
नमस्ते देव विश्वेश नमस्ते शूरनायक।
शूलपाणे नमस्तेऽस्तु नमस्ते विश्वभावन।। 8

दिव्यदेहसमन्वितो वेनोऽपि स्थाणुस्वरूपं शिवं स्तोतुं प्रचक्रमे – प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम् –[9] इत्यारभ्य सप्तचत्वारिंशाध्यायपर्यन्तं सर्वतोभावेन शम्भुं नमश्चक्रे। तुष्टः शिवोऽस्य स्तोत्रस्य फलश्रुतिमूचे–

वेनप्रोक्तं स्तवमिमं कीर्तयेद यः शृणोति च।
नाऽशुभं प्राप्नुयात् किञ्चिद् दीर्घमायुरवाप्नुयात्।। 48.7

एकदा ब्रह्मा स्वकृत-पाप-प्रक्षालनाय सन्निहत्य सरः प्राप्य शिवाराधनमकरोत्। भक्तियुक्तस्य शिवपूजारतस्य तस्य समीपं भगवान् नीललोहित आजगाम। तदा लोकपितामहः तस्य स्तुतिम् एवं कृतवान्–

नमस्तेऽस्तु महादेव भूत-भव्य-भवाश्रय।
नमस्ते स्तुति-नित्याय नमस्त्रैलोक्यपालिने।। 49.11

अष्टकरूपेण कृता एषा स्तुतिः श्रुतिसुभगा ईशमाहात्म्यप्रकटनपरा च।

एकदा सर्वाङ्गसुन्दरो नग्नो शंकरः भिक्षामटन् मुनीनामाश्रमं ययौ। तमाश्रममगतम् अवलोक्य ब्रह्मवादिनां स्त्रियः तस्य रूपेण मोहिताः बभूवुः। नारीषु कामपरासु सतीषु मुनयः कुपिताः सन्तः हरलिङ्गम् अपातयन्। लिङ्गे पातिते शम्भुरन्तर्दधौ। अनन्तरं मुनयः ब्रह्मणा सार्धं हरस्य शरणं जग्मुः। तैः सरोमध्ये हस्तिरूपधरः शिवः दृष्टः। ततः सर्वे देवाः इन्द्रादयः ब्रह्माणं पुरस्कृत्य ऊचुः–

त्वया त्यक्तं महादेव लिङ्गं त्रैलोक्यवन्दितम् इति। 44.33

अनन्तरं हरः ऋषिभिः सार्धं देवदारुवनं ययौ। हस्तिरूपधरो भगवान् महादेवो लिङ्गं करेण जग्राह। तदा ऋषयः तम् तुष्टुवुः–

नमस्ते परमात्मन् अनन्तयोने लोक साक्षिन् ......इत्यादिः। गद्यमयी एषा स्तुतिः भगवतः शिवस्य स्वरूपं वर्णयन्ती नामप्रभावं पुष्णाति।

अपिच चित्राङ्गदा विवाह प्रसंगे शिवस्तुतिः गद्यरूपेण उपलभ्यते–ॐ नमोऽस्तु शर्व शंभो....इत्यारभ्य वक्राक्षिचरण हाटकेश्वर नमस्ते इत्यन्तम्। 65.120

अनन्तरं पुराणेऽस्मिन् शुम्भ-निशुम्भहन्त्रीम् अम्बिकां स्तुवन्तः सर्वे देवाः हर्ष निर्भराः बभूवुः।

देवा ऊचुः–

नमोऽस्तु ते भगवति! पापनाशिनि!
नमोऽस्तु ते सुररिपुदर्प-शातिनि!
नमोऽस्तु ते हरि-हर-राज्यदायिनि!
नमोऽस्तु ते मख-भुज-कार्यकारिणि।। 56.56

अपिच–

ब्रह्माणी त्वं मृडानी वरशिखिगमना शक्तिहस्ता कुमारी।
वाराही त्वं सुवक्त्रा खगपतिगमना वैष्णवी त्वं सशार्ङ्गी।।
दुर्दृश्या नारसिंही घुरघुरितरवा त्वं तथैन्द्री स वज्रा।
त्वं मारीचर्ममुण्डा शवगमनरता योगिनी योगसिद्धा।। 56.62

एतादृशीं स्तुतिं श्रुत्वा देवी वरदा बभूव।

उमाशिवयोः पुत्रः स्कन्दः कृत्तिकाभिश्च पोषितः कार्त्तिकेय नामा यदा सेनापतित्वेन अभिषिक्तो बभूव; तदा तेन सर्वे ज्येष्ठा श्रेष्ठाश्च नमस्कृताः[10]। एकदा मन्दधीः दुरात्मा अन्धकासुरः महाकालपाशवशीकृतः सन् महादेवेन शिवेन सह योद्धुं मन्दराचलमाययौ। तस्मिन् समये भगवता भूत-भावनेन महापाशुपतगणाः समामन्त्रिताः। तानालिङ्गय शूलपाणिः प्रसन्नो जातः। तस्मिन् समये भक्तिभावाञ्चितैः सर्वैः गणैः शिवस्य हरिहरोभयात्मकं स्वरूपं साक्षात्कृतम्, अथ च क्षणात् शर्वः पितामहोऽभूत्। तदनन्तरं सर्वान् देवान् गणाञ्च युद्धाय प्रेरितवान्। ते च गणाः असुरान् संहर्तुं प्रवृत्ताः। स्वसैन्यं प्रणष्टमवलोक्य अन्धकः शुक्राचार्यमुपगतः। तेन तपस्विना संजीवनीविद्यया सर्वे मृता असुराः पुनरुज्जीविताः। एवं क्रमेण संग्रामे घोरः कोलाहलः जातः। प्रमथासुरयोः महासमरे इन्द्रादयो देवताः अपि समाययुः। अकस्मात् नन्दी शुक्रं समाक्रमत्। गणनायको नन्दी तं हरसमीपमानयत्। शम्भुना योगबलेन भार्गवः उदरे स्थापितः। तदा जठरस्थः कविः भार्गवः शुक्राचार्यः शिवमस्तौत् - वरदाय नमस्तुभ्यं शिवाय वरशालिने। शङ्कराय महेशाय विश्वेशाय नमो नमः।। इत्यारभ्य "त्रिनयन हर भव शङ्कर उमापते जीमूतकेतो गुहाश्मशानविरत भूत विलेपन शूलपाणे पशुपते गोपते तत्पुरुष-सत्तम नमो नमस्ते[11] इति वदन् जठरान्निर्गमं ययाचे। एवं क्रमेण सर्वेषामसुराणां विनाशे सति भगवता हरेण वर्षसहस्रपर्यन्तं स्वनेत्रार्कहुताशनेन शुष्कीकृतः खलु अन्धकासुरः। तेन शम्भुसमुद्भवेन अग्निना सोऽसुरराड् विमुक्तपापो बभूव। ततोऽन्धकं देवाधिदेवं वरदं वरेण्यं महादेवं प्रसादयामास–

नमोऽस्तु ते भैरव! भीममूर्ते! त्रैलोक्य गोप्त्रे सित शूलपाणे।
कपालपाणे भुजगेशहार त्रिनेत्र मां पाहि विपन्नबुद्धिम्।।[12]

अस्मिन् स्तोत्रे अन्धकेन महादेवस्य वैदिकम् औपनिषदं, पौराणिकं सर्वदेवमयत्वम् अनाद्यत्वम् अनन्तत्वञ्च समुपवर्णितम्। "पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः। त्राहि मां देवदेवेश सर्वपापहरो भव"।[13] इत्युदीरयन्तम् अन्धकासुरं दैत्यभावेन विमोच्य भृङ्गीपदं दत्तवान् किल भगवानाशुतोषः। अनन्तरं भवेन भवान्यै पुत्ररूपेणार्पितोऽन्धकः भक्तिभावाञ्चितः सन् गौरीं तुष्टाव–

"नमस्तेऽस्तु भवानीं भूतभव्यप्रियां लोकधात्रीं जनयित्रीं स्कन्दमातरं महादेवप्रियां स्यन्दिनीं चेतनां त्रैलोक्यमातरं

धरित्रीं देवतां मातरं श्रुतिं स्मृतिं दयां लज्जां कामसूं प्रीतिं सदापावनीं देत्यसैन्यक्षयकरीं महामायां सुमायां वैजयन्तीं शुभां कालरात्रिं गोविन्दजननीं शैलराजपुत्रीं सर्वदेवार्चितां विद्यां सरस्वतीं त्रिनयनमहिषीं नमस्यामि मृडानीं शरण्यां शरणमुपयातेऽहं नमो नमस्ते (70.90)

अपिच चतुरशीतितमेऽध्याये प्रह्लादेन कृतायाः सारस्वतस्तुत्या, संकेतोपलभ्यते स्थितः स्थण्डिलशायी च पठन् सारस्वतं स्तवम् इति। (84.45)

*वामन-पुराणे* चतुर्ण्णां स्तोत्रकदम्बानां महत्त्वपूर्ण उल्लेखः प्राप्यते। महर्षिणा नारदेन मुनिः पुलस्त्यः पृष्टः–

यान् जप्यान् भगवद्भक्तया प्रह्लादो दानवोऽजपत्।
गजेन्द्र-मोक्षणादीस्त्वं चतुरस्तान् वदस्व मे।। (85.1)

प्रहृष्टः पुलस्त्यः प्रथमं तावत् तस्य सरोवरस्य सुरम्यं वर्णनं कृतवान्; एकदा तृषितः स्नातुकामः कश्चिद् गजेन्द्रः यस्मिन् सरसि स्वकरेणुभिः सार्धमवतीर्णः। तस्मिन् सरसि कश्चिद् दुष्टात्मा ग्राहोऽपि अन्तर्जलेशयो सन् निगूढः। तेन गज आकृष्टः। वर्षसहस्रकं युद्धे जातेऽपि तेन ग्राहेण घोरैः पाशैर्वेष्टितः। तदा स नागवरः नारायणपरायणः सन् तमेव शरणं गतः। अत्यार्तभावेन आपद् विमोक्षम् अन्विच्छन् भगवतः केशवस्य सहस्रशुभ-नामान्वितं स्तोत्रम् उदीरयत् – ॐ नमो मूलप्रकृतये अजिताय महात्मने। अनाश्रिताय देवाय निःस्पृहाय नमोऽस्तु ते[14] इत्यारभ्य "नमस्ते पुण्डरीकाक्ष! भक्तानामभयप्रद! ; अब्रह्मण्य! नमस्तेऽस्तु त्राहि मां शरणागतम्"[15] इत्यन्तम् ऊनत्रिंशत्सु श्लोकेषु भगवतो नारायणस्य परब्रह्मणः परमात्मनः व्यक्ताव्यक्तस्वरूपस्य सहस्रशिरसःच सहस्राक्षस्य, परात्परस्य, अनाद्यनन्तस्य आर्तत्राणपरस्य सान्द्रं स्तवनं कृतम्। तदा शङ्खचक्रगदाधरः केशवः गरुड़ारूढ़ः सन् सरः समीपं समागत्य ततः गजेन्द्रग्राहौ उज्जहार। चक्रेण ग्राहं विदीर्य गन्धर्वसत्तमं हूहूं शापान्मुमोच। शरणागतं गजेन्द्रं करेण स्पृष्ट्वा दिव्यत्वं प्रापयामास। तस्मिन् क्षणे "महर्षयः चारणाश्च दृष्ट्वा गजविमोक्षणम्। विस्मयोत्फुल्लनयनाः संस्तुवन्ति जनार्दनम्"।।[16]

अन्ते चास्य स्तवराजस्य फलश्रुतिं दर्शयता पुराणकारेण प्रोक्तम्–

गजेन्द्रमोक्षणं पुंसां सर्वपापप्रणाशनम्।
कथितेन स्मृतेनाथ श्रुतेन च तपोधन!
एतत्पवित्रं परमं सुपुण्यं संकीर्तनीयं चरितं मुरारेः।
यस्मिन् किलोक्ते बहुपाशबन्धात् लभेत मोक्षं द्विरदो न यद्वत्।।[17]

एतदनन्तरम् अस्मिन्पुराणे एकेन तपोनिधिना ब्राह्मणेन स्वात्मरक्षार्थं विष्णुपञ्जरं स्तोत्रमित्थं पठितम्–

विष्णुः प्राच्यां स्थितश्चक्री विष्णुर्दक्षिणतो गदी। 86.9
प्रतीच्यां शार्ङ्गधृग् विष्णुर्विष्णुः खड्गी ममोत्तरे।।
हृषीकेशो विकोणेषु तच्छिद्रेषु जनार्दनः।
क्रोडरूपी हरिर्भूमो नरसिंहोऽम्बरे मम।।10।।
क्षुरान्तममलं चक्रं भ्रमत्येतत्सुदर्शनम्।
तस्यांशुमाला दुष्प्रेक्ष्या हन्ति प्रेतनिशाचरान्।।11।।
गदा चेयं सहस्रार्चिरुर्ध्वं हन्तुं वृकांस्तथा।
रक्षो-भूत-पिशाचानां डाकिनीनाञ्च शातनी।।12।।
शार्ङ्गविस्फूर्जितं चैव वासुदेवस्य मद्रिपून्।
तिर्यङ्-मनुष्य-कूष्माण्ड-प्रेतादीन् हन्त्वशेषतः।।13।।

खड्गाधारीज्जलज्ज्योत्स्ना निर्धूता ये ममाहिताः।
ते यान्तु सौम्यास्तान् सद्यो गरुड़ेनेव पन्नगाः।।14।।
ये कूष्माण्डास्तथा दैत्या यक्षा ये च निशाचराः।
प्रेता विनायका क्रूरा मनुष्या जृम्भकाः खगाः।।15।।
सिंहादयो ये पशवो दंदशूकाश्च पन्नगाः।
सर्वे भवन्तु ते सौम्या विष्णुशंखरवाहताः।।16।।
चित्तवृत्तिहरा ये च ये जनाः स्मृतिहारकाः।
बलौजसां च हर्तारः छाया विभ्रंशकाश्च ये।।17।।
ये चोपभोगहर्तारो ये च लक्षणनाशकाः।
कूष्माण्डास्ते प्रणश्यन्तु विष्णुचक्ररवाहताः।।18।।
बुद्धिस्वास्थ्यं मनः स्वास्थ्यं स्वास्थ्यमैन्द्रियकं तथा।
ममास्तु वासुदेवस्य देवदेवस्य कीर्तनात्।।19।।
पृष्ठे पुरस्तादथ दक्षिणोत्तरे, तथैव कोणे तु जनार्दनो हरिः।
तमीड्यमीशानमनन्तमच्युतं, जनार्दनं प्राणपतिं न सीदति।।20।।
यथा परं ब्रह्म हरिस्तथा परं, जगत्स्वरूपं च स एव केशवः।
ऋतेन तेनाऽच्युतनामकीर्तनात् प्रणाशमेत त्रिदिवं ममाशुभम्।।21।।

तस्य तपोनिधेः समीपं गत एको राक्षसो विष्णुपञ्जरस्तोत्ररूप-कवच-प्रभावेण निर्धूततेजः सन् मासचतुष्टयं यावत् तत्रैव तस्थौ। समाधिस्थो द्विजो जपावसाने सति यदा निशाचरं तत्रापश्यत् तदा तस्यागमनकारणमपृच्छत्। स स्वकृतानि निकृष्टकर्माणि याथातथ्यमुपवर्ण्य विप्रं स्वोद्धारस्योपायम् अपृच्छत्। किन्तु मुनिः तमधमम् उक्तवान्-

करिष्ये यातुधानानां नत्वहं धर्मदेशनम् इति (86.38)

गते च तस्मिन् स राक्षसः षष्ठे षष्ठे एव दिवसे एकं जन्तुमुपभुज्य स्वक्षुधामशान्तयत्। अथ कालानन्तरमेको ब्राह्मणब्रह्मचारी तं मार्गेऽमिलत्। तं भक्षितुं स राक्षसो यावत्प्रवृत्तः तावत् स अवोचत् -

यद्यवश्यं त्वया चाहं भक्षितव्यो निशाचर
आयास्यामि तवाद्यैव विनिवेद्य गुरवे फलम्।। 86.45

राक्षसोऽब्रवीत्-

यानि यानि च कर्माणि बालत्वात् चरितानि च।
दुष्टां योनिमिमां प्राप्य तन्मुक्तिं कथय द्विज।। 86.53

स किल ब्रह्मचारी मुनिसुतः चिरं विमृश्य जातवेदसं शरणं ययौ। ततः-

इत्येवं मनसा सत्यं कुर्वतः शपथाद् मुनेः
सप्तार्चिषा समादिष्टा प्रादुरासीत् सरस्वती।। 86.61

मुनिपुत्रः सारस्वतं स्तोत्रमिदं निशाचरं श्रावयामास। यस्मिन् स्तवे श्रीहरेः महिमानं भगवती सरस्वती स्वयमेव वर्णितवती-

ॐ हरिं कृष्णं हृषीकेशं वासुदेवं जनार्दनम्।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु।। 86.67

इत्यारभ्य त्रयस्त्रिंशच्छ्लोकेषु श्री भगवतो नारायणस्य विविधैर्विशेषणैः माहात्म्यं प्रकटितम्। अन्ते फलश्रुतिं दर्शयता तेन मुनिकुमारेण प्रोक्तम्–

जपत्येवं नरः पुण्यं वैष्णवं धर्ममुत्तमम्।
इष्टानिष्ट-प्रसङ्गेभ्यो ज्ञानतोऽज्ञानतोऽपि वा।। 86.105
एतद् भद्र मया ख्यातं तव पातक नाशनम्।
विष्णोः सारस्वतं स्तोत्रं यद् यद् ऊचे सरस्वती।। 86.112
अनेनैव जगन्नाथं त्वमाराधय केशवम्।
ततः शापापनोदं तु स्तुते लप्स्यसि केशवे।। 114

तृतीयं तावन्महेश्वरेण प्रोक्तं पापनाशानस्तोत्रम्। अस्मिन् स्तवे सप्तचत्वारिंशच्छलोकैः भगवते नारायणाय नमस्कारपूर्वकं तन्महिमागानं विहितम्। पुरा वाराणस्याम् आदिकेशवम् अभि भगवान् भूतभावनः गंगोदकतीर्थे वरुणासङ्गमे इमां स्तुतिं सम्पठ्य शान्तिं प्राप्तवान्, यः खलु मानवः स्तवमिमं पठेत्, स सर्वपाप विमुक्तः सन् परमां शान्तिं लभेत–

महेश्वरेण कथितं वाराणस्यां पुरा मुने!
केशवस्याग्रतो गत्वा स्नात्वा तीर्थोदके शुभे!
उपशान्तस्तदा जातो रुद्रः पापोपशान्तिदम्।

एतत्पवित्रं त्रिपुरघ्न-भाषितं
पठन्नरो विष्णुपुरे महर्षे!
विमुक्तपापोप्युपशान्तमूर्तिः
सम्पूज्यते देववरैः ससिद्धैः।। 87.48-49

अपरमपि पापनाशन-स्तोत्रं महर्षिणा अगस्त्येन उदीरितम्। अत्रापि सप्तविंशतिपद्यानि सन्ति। तेषु श्रीहरेः कीर्तिः समुपवर्णिता–

एतत्पवित्रं परमं पुराणं, प्रोक्तं त्वगस्त्येन महर्षिणा च।
धन्यं यशस्यं बहुपापनाशनं, सङ्कीर्तनात् स्मरणात् स्पर्शनाच्च।। 88.28

सर्वेषु ऋषिमुनिषु तत्तस्थलेषु गतेषु शुक्राचार्यः भार्गववंशस्य मुनीन् यज्ञविधो न्ययुङ्क्त। तस्मिन्यज्ञे शुक्रः बलेः यज्ञदीक्षां चकार। तेन श्वेतवर्णोऽश्वः सम्पूर्णां महीं चरितुम् उत्सृष्टः। एवम् अश्वे समुत्सृष्टे गते च मासत्रये यज्ञार्थमग्रेः आहरणे कृते सति यदा भगवान् भास्करो मिथुनराशौ चक्राम तदा देवजननी अदितिः विष्णुं वामनाकृतिं सुषुवे। अनन्तरमेव ब्रह्मा महर्षिभिः समं तस्यावतारिणः स्तवनं चकार–

नमोऽस्तुते माधव सत्त्वमूर्ते!
नमोऽस्तुते सात्वत विश्वरूप!
नमोऽस्तु ते शत्रुवनेन्धनाऽग्रे!
नमोऽस्तु ते पापमहादवाऽग्रे।। इत्यादिः 89.36-39

बलेः बन्धने जाते त्रिविष्टपं देवराजाय च प्रदाय श्रीहरिः अन्तर्दधौ। अथ ब्रह्मा विधिना पूजनादिना हरिं पप्रच्छ - किं चिरेण भगवता आगमनं कृतम् इति? तदा जगत्स्वामी प्रोवाच - हे स्वयंभो! मया सुराणां हिताय बलेर्बन्धरूपं महत्कार्यं कृतम्। ब्रह्मणः कथं कथमिति साम्रेडं पृष्टे भगवान् गरुड़ध्वजः स्व स्वरूपं दर्शयामास। तदा स ब्रह्मा भक्तिभावाञ्चितः सन् एवं स्तौति–

ॐ नमस्ते देवाधिदेव वासुदेव एकशृङ्ग बहुरूप[18] ....इत्यारभ्य सम्पूर्णम् अध्यायपर्यन्तं कृतोऽयं ब्रह्मस्तवः भगवतः विशदं विराड्रूपं उपबृंहयति।

रसातलं प्राप्य बलिः तत्र सुखेन उवास। एकदा तत्र सहसा भागवतं सुदर्शनचक्रं समागतम्। बलेः पत्नी विंध्यावली दैत्यराजं मधुरं वाक्यं जगाद–

एतद् भागवतं चक्रं दैत्यचक्रक्षयंकरम्।
सम्पूजनीयं दैत्येन्द्र! वामनस्य महात्मनः।। 94.10

तदा बलिः चक्रं तुष्टुवे–

नमस्यामि हरेश्चक्रं दैत्यचक्रविदारणम्।
सहस्रांशु सहस्राभं सहस्रारं सुदर्शनम्।।

इत्यारभ्य 'त्वन्नामकीर्तनाच्चक्र! दुरितं यातु संक्षयम्' इत्युक्त्वा बुद्धिमान् दैत्यराजः बलिः पुण्डरीकाक्षं सस्मार। निष्क्रान्ते सति सुदर्शने बलिः विक्लवो बभूव। तदा स्वपितामहमस्मरत्। स खलु दानवेश्वरः स्वपौत्रम् उपादिशत्–

किं तस्य बहुभिर्मन्त्रैः, भक्तिर्यस्य जनार्दने।
नमो नारायणायेति मन्त्रः सर्वार्थसाधकः।। 94.58

अन्ते उपसंहरन् महर्षिः पुलस्त्यो वामनपुराणस्य श्रवणफलं कीर्तयन् भगवन्तं श्रीहरिम् इत्थं स्तौति–

नमो नमः कारणवामनाय नारायणायामितविक्रमाय।
श्री शार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय।। 95.89

वयं तु पश्यामः - पुराणेऽस्मिन् स्तवानां यथा वैविध्यं प्रस्तुतीनामपि तथैव। एकतः शङ्करस्य, चण्डिकायाः भैरवस्य च स्तुतिः कृता अपरत्र तु वामनाकृतेः नारायणस्य वारम्बारं वैशद्येन स्तवनं विहितम्। पुराणेऽस्मिन् अष्टौ स्तवाः शंकरस्य अष्टादश च भगवतो नारायणस्य प्राधान्येन उपलभ्यन्ते। तेषु सर्वेषु गद्यपद्यमयेषु स्तोत्रकदम्बेषु भगवत्तत्त्वस्य वैदिकम् औपनिषदं पौराणिकं सगुणमथ च निर्गुणनिराकारतत्त्वरूपेण भावपूर्णं निरूपणं विहितम्। मन्ये यथा त्रिविक्रम उरुक्रमः सञ्जातः तथैव वैपरीत्ये सर्वेषां विस्तृतानां नमस्काराणां महिम्नां च पर्यवसानं 'ॐ नमो नारायणाय' इति अष्टाक्षरे मन्त्रे बीजरूपेण कृतं पुराणकारेण। तेन च - आकाशात्पतितं तोयं सागरमभिगच्छति। सर्वदेव नमस्कारं केशवं प्रति गच्छतीति बत् सर्वेषां स्तुतीनां परागतिः अष्टाक्षरमन्त्रे भवतीति हृदयम्।।

इदमत्र अवधेयम्– नाम संकीर्तनस्य यन्माहात्म्यम् अस्मिन् पुराणे प्रकटितं तस्य प्रभावः विशाले परवर्ति स्तोत्रसाहित्ये पदे पदे परिलक्ष्यते। ऋग्वेदकालादविच्छिन्न प्रवाहा संस्कृत सरस्वती अद्यावधि स्तुति रचनायाः परम्परां संवर्धयन्ती दृश्यते। स्तुतीनां विभागः त्रिधा क्रियते। केचन पारम्परिकस्तवनपराः, अन्ये वर्णनमात्रात्मकाः, अपरे च साहित्य-कला-लालित्य-परिपूर्णा उक्तिपरवक्त्र-भङ्गिम-जुष्टा रुचिरभावभरिता रसोक्तिरम्या विद्यन्ते। परवर्ति स्तोत्रसाहित्ये पुराणेषु विकीर्णानां स्तवानां प्रभावः परिलक्ष्यते। पुष्पदन्त कृत शिवमहिम्नस्तोत्रे, जगद्धरभट्टकृत दीनाक्रन्दन स्तोत्रे, आदिशंकर विरचित शिवाष्टोत्तरनाम - शिवानन्दलहरी -शिवपञ्चाक्षरस्तोत्रेषु अन्येषु च स्फुटस्तवेषु, रावणकृत शिवताण्डवे अन्येषु च शिवपरकस्तवनेषु एकतः काव्यगतरमणीयताया अजस्रप्रवाहो लभ्यते, अपरत्र तु वामनपुराणानुसारिणी नामसङ्कीर्तन-धारा सुप्रवाहिता। तथाहि - भवः शर्वोरुद्रः ...(28), त्वमर्कः त्वंसोमः (26) शिवाकान्त शम्भो शशाङ्कार्धमौले ... इत्यादिषु नाना स्तवेषु नाम्नां सहस्रं परीदृश्यते। दुर्वासा मुनिकृत शक्तिमहिम्न स्तोत्रे, आदिशंकरविरचित सौन्दर्यलहर्यां, महात्रिपुर राजराजेश्वरीस्तवेषु अन्येषु च, अन्येषां कवीनां च शक्तिस्तोत्रेष्वपि देव्या महिमा यथा प्रतिपादितः तथा वामन पुराणेऽपि दृश्यते। उक्तिभङ्गी वैशिष्ट्यं तु प्रतिपदं परिपालनीयम्। अपि

च वैष्णव-पञ्जर-स्तोत्रवत् परवर्तिसाहित्ये वैष्णवभक्तानामथ च आदिशंकर रचितानां स्तवानामपि वैशिष्ट्यं दृश्यते। तत्रापि भक्तिरसप्रवाह-प्रवणेष्वपि सुललितपदविन्यासेषु नाम संकीर्तनं प्रतिपाद्यते। 'भज गोविन्दम् इत्यादि विश्रुते स्तोत्रेऽपि नाम संकीर्तनमेव विधीयते। एवमन्यदपि बोध्यम्। अतएव वक्तुं शक्यते *वामनपुराणस्य* स्तोत्रसाहित्यस्य संवर्धने महत्त्वपूर्णं योगदानं वर्तते इति शम्।।

## संदर्भ


1. परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः।
   खद्योतेभ्य इवादित्यप्रभेव बलवत्तरा।। भक्तिरसायन 13.76
2. रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः। काव्यप्रकाश 3.4
3. वामनपुराणम् 3/14
4. तदेव 3/22
5. तदेव 17/26-36
6. तदेव 27/17-38
7. तदेव 30/18-31
8. तदेव 32/6-22
9. तदेव 47/62-163
10. नमोऽस्तु भवतां देवा! ओं नमोऽस्तु तपोधनाः।
    युष्मत्प्रसादाद् ज्येष्यामि शत्रू महिषतारकौ।। 58/3 वामनपुराणे
11. तदेव 69/28-31
12. तदेव 70/50-64
13. तदेव 70/57
14. तदेव 85/32
15. तदेव 85/60
16. तदेव 85/79
17. तदेव 85/82-83
18. भक्तिं गतो महादेवे पद्मजः स्तोत्रमैरयत्।। 93/8
    ॐ नमस्ते देवाधिदेव.... विक्रमोऽसि नमस्ते।।8।।